दिनाङ्क :-21.01.2025

प्रात: - 06:55

<u>ट्रम्प-शपथवचनम्</u>

डोनाल्डट्रम्प-इत्यसौ संयुक्तराज्यामेरिकाया: सप्तचत्वारिंशत्तमाय राष्ट्रपतिपदाय शपथवचनं स्वीकृतवान्। असौ स्वीय-द्वितीयकार्यकालाय शपथग्रहणम् अकरोत्। मुख्यन्यायाधीश: जॉनरॉबर्ट्स- इत्येष: ह्य: रात्रौ वाशिंग्टन-डी.सी.नगरे कैपिटल-रोटुण्डाइत्यत्र ट्रम्पइत्यस्मै शपथवचनम् अददात्। जेडी. वेंस. इत्येष: उपराष्ट्रपतित्वेन शपथग्रहणं स्वीकृतवान्। स्वकीये औद्घाटनिके सम्भाषणे राष्ट्रपति: ट्रम्पइत्ययं मूल्यानां न्यूनीकरणे राष्ट्रियोर्जापात्कालस्य घोषाणां कृतवान् यद्धि तस्य प्रचाराभियानस्य प्रमुखो- द्देश्यमासीत् इति। स: सबलतया अवोचत् यत् अत्यधिकव्ययेन ऊर्जाया: वर्धमान- मूल्येन च मुद्रास्फीति- सङ्कट: जात:। नूतन: राष्ट्रपति: स्वस्य मन्त्रिमण्डलस्य विशालशक्ते: उपयोगेन वस्तूनां मूल्यानि न्यूनीकर्तुं निर्देशं दातुं प्रतिज्ञां कृतवान्। असौ अग्रे अघोषयत् तस्य नेतृत्वे अधुना अमरिका-देशस्य स्वर्णयुगस्य आरम्भ: भवति इति। प्रधानमन्त्री नरेन्द्रमोदी डोनाल्डट्रम्प इत्यस्मै शुभकामना: प्रदत्तवान्। एकस्मिन् सामाजिक-सन्देशपटले श्रीमोदिना लिखितं यत् असौ पुनरेकवारं मिलित्वा कार्यं सम्पादयितुं उभयो: देशायो: लाभाय विश्वस्य उत्तमभविष्यस्य निर्माणाय च उत्सुक: अस्तीति।

<u>प्रधानमन्त्री- जनमनसम्मेलनम्</u>

केन्द्रीय- जनजातीय- कार्य-विषयक-मन्त्रालय: अद्य नवदिल्ल्या: भारतमण्डपे प्रधानमन्त्री-जनमन- इत्येनं विषयं समाश्रित्य जनपदाधिकारिणां राष्ट्रियसम्मेलनम् समायोजयिष्यति। एतस्मिन् सम्मेलने जनजातीयकार्यमन्त्री जुएल्-ओरांव-इत्यसौ जनजातीय-कार्य-राज्य-मन्त्री दुर्गादास-उइके-इत्येष: च सम्मिलितौ भविष्यत:। सम्मेलने षड्प्रमुखानि क्षेत्राणि भविष्यन्ति येषु ग्रामीणविकास: छात्रावास: पेयजलापूर्ति: आगनवाडीइत्येतेषां सञ्चालनं बहुविषयककेन्द्राणि च सम्मिलितानि। सम्मेलनस्य उद्देश्यं तेषु जनपदेषु प्रगतिं समुचितं कर्तुमस्ति यत्र परिष्कारस्य सम्भावनास्ति।

<u>रक्षा-गणतन्त्रदिवस:</u>

अस्य वर्षस्य गणतन्त्रदिवस्य पथसञ्चलनम् भारतस्य सांस्कृतिकविधितां सैन्यशकितं च प्रदर्शयितुं सज्जं वर्तते। यत्र संविधानस्य पञ्चसप्तति-वर्षाणां क्रियान्वयन-जनभागीदारी-इत्येतयो: कृते विशिष्टं ध्यानं प्रदीयते। अस्मिन् वर्षे इण्डोनेश्यिादेशस्य राष्ट्रपति: प्रबोवो-सुबियान्तो-इत्येष: अस्य गणतन्त्रदिवसस्य मुख्यातिथि: भविष्यति। नवदिल्ल्यां वार्ताहरान् सूचयन् रक्षासचिव: राजेशकुमारसिंह: सूचितवान् यत् विभिन्न- राज्यानां केन्द्रशासितप्रदेशानां केन्द्रप्रशासनस्य मन्त्रालयानां विभागानाञ्च अनेकानि रमणीयानि चित्राणि प्रदर्शयिष्यन्ति।

उत्तराखण्ड - यू.सी.सी.इति

उत्तराखण्ड-राज्ये, राज्यमन्त्रिमण्डलेन समान-नागरिक-संहिता स्वीकृता, यया राज्ये तस्याः कार्यान्वयनस्य मार्गः प्रशस्तः अभवत्। अयं निर्णयः देशस्य अन्येषु राज्येषु प्राधान्यं स्थापयिष्यति इति अपेक्ष्यते। वार्ताहरान् संसूचयन् मुख्यमन्त्री पुष्कर-सिंह-धामी समान-नागरिक-संहितायाः प्रभावस्य विषये आशां प्रकटितवान्। सः अवदत् यत् उत्तराखण्डस्य समान-नागरिक-संहितायाः स्वीकरणं शेषभारतस्य कृते प्रेरणारूपेण कार्यं करिष्यति।

दिल्लीविधानसभा

दिल्ली-विधानसभायाः निर्वाचनाय आहत्य नवनवत्यधिक-षड्शतं प्रत्याशिनः नैर्वाचनिकरणे सन्ति। ह्यः नामङ्कनप्रत्यावर्तनाय अन्तिमं दिनमासीत्। विधानसभानिर्वाचनम् आगामिमासस्य पञ्चमे दिनाङ्के अथच मतगणना अष्टमे दिनाङ्के भविष्यति।

॥ इति वार्ताः॥